**विद्या भवन बालिका विद्यापीठ लखीसराय**

**वर्ग नवम विषय संस्कृत शिक्षक श्यामउदय सिंह**

**ता:-16-08-2021(एन.सी.आर.टी. पर आधारित)**

**पाठ: षष्ठ: पाठनाम भ्रान्तो बाल:**

**अधोलिखितानां प्रश्नानाम् उत्तराणि संस्कृतभाषया लिखत-**

i. **बालः कदा क्रीडितुं निर्जगाम?**
ii. **बालस्य मित्राणि किमर्थं त्वरमाणा बभूवुः?**
iii. **मधुकरः बालकस्य आह्नानं केन कारणेन न अमन्यत?**
iv. **बालकः कीदृशं चटकम् अपश्यत्?**
v. **बालकः चटकाय क्रीडनार्थं कीदृशं लोभं दत्तवान्?**
vi. **खिन्नः बालकः श्वानं किम् अकथयत्?**
vii. **विघ्नितमनोरथः बालः किम् अचिन्तयत्?**

**उत्तराणि-**

i. बालः पाठशालागमनवेलायां क्रीडितुं निर्जगाम।
ii. बालस्य मित्राणि विद्यालयगमनाय त्वरमाणा बभूवुः।
iii. मधुकरः मधुसंग्रहव्यग्रः आसीत्। अतः सः बालकस्य आह्वानं न अमन्यत।
iv. बालकः तृणशलाकादिकम् आददानं चटकम् अपश्यत्।
v. बालकः चटकाय क्रीडनार्थं स्वादुभक्ष्यकवलानां लोभं दत्तवान्।
vi. खिन्नः बालकः श्वानं क्रीडासहायकम् भवितुम् अकथयत्।
vii. विघ्नितमनोरथः बालः अचिन्तयत् - अस्मिन् संसारे अहम् इव कोऽपि कालं न यापयति। अतः अहम् अपि स्वोचितं कार्यं करोमि।